# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (प्रथम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥ अथ श्रीदुर्गासप्तशती ॥

॥ अथ प्रथमोऽध्यायः ॥

विनियोगः

अस्य श्री प्रथमचरित्रस्य । ब्रह्मा ऋषिः ।

महाकाली देवता । गायत्री छन्दः । नन्दा शक्तिः ।

रक्तदन्तिका बीजम् । अग्निस्तत्त्वम् ।

ऋग्वेदः स्वरूपम् । श्रीमहाकालीप्रीत्यर्थे

प्रथमचरित्रजपे विनियोगः ।

। ध्यानम् ।

ॐ खड्गं(ञ्) चक्रगदेषुचापपरिघाञ्छूलं(म्) भुशुण्डीं(म्) शिरः(श्),

शङ्खं(म्) सन्दधतीं(ङ्) करैस्त्रिनयनां(म्) सर्वाङ्गभूषावृताम् ।

नीलाश्मद्युतिमास्यपाददशकां(म्) सेवे महाकालिकां(यँ),

यामस्तौत्स्वपिते हरौ कमलजो, हन्तुं(म्) मधुं(ङ्) कैटभम् ॥

ॐ नमश्चण्डिकायै ॥

ॐ ऐं मार्कण्डेय उवाच ॥ 1॥

सावर्णिः(स्) सूर्यतनयो , यो मनुः(ख्) कथ्यतेऽष्टमः ।
निशामय तदुत्पत्तिं(वँ), विस्तराद्गदतो मम ॥ 2॥

महामायानुभावेन , यथा मन्वन्तराधिपः ।
स बभूव महाभागः(स्), सावर्णिस्तनयो रवेः ॥ 3॥

स्वारोचिषेऽन्तरे पूर्वं(ञ्), चैत्रवं(म्)शसमुद्भवः ।
सुरथो नाम राजाभूत्- समस्ते क्षितिमण्डले ॥ 4॥

तस्य पालयतः(स्) सम्यक्, प्रजाः(फ्) पुत्रानिवौरसान् ।
बभूवुः(श्) शत्रवो भूपाः(ख्), कोलाविध्वं(म्)सिनस्तदा ॥ 5॥

तस्य तैरभवद् युद्ध- मतिप्रबलदण्डिनः ।
न्यूनैरपि स तैर्युद्धे कोलाविध्वं(म्)सिभिर्जितः ॥ 6॥

ततः(स्) स्वपुरमायातो, निजदेशाधिपोऽभवत् ।
आक्रान्तः(स्) स महाभागस्- तैस्तदा प्रबलारिभिः ॥ 7॥

अमात्यैर्बलिभिर्दुष्टैर्- दुर्बलस्य दुरात्मभिः ।
कोशो बलं(ञ्) चापहृतं(न्), तत्रापि स्वपुरे ततः ॥ 8॥

ततो मृगयाव्याजेन, हृतस्वाम्यः(स्) स भूपतिः ।
एकाकी हयमारुह्य , जगाम गहनं(वँ) वनम् ॥ 9॥

स तत्राश्रममद्राक्षीद्- द्विजवर्यस्य मेधसः ।
प्रशान्तश्वापदाकीर्णं(म्), मुनिशिष्योपशोभितम् ॥ 10॥

तस्थौ कञ्चित्स कालं(ञ्) च , मुनिना तेन सत्कृतः ।
इतश्चेतश्च विचरं(म्)स्- तस्मिन् मुनिवराश्रमे ॥ 11॥

सोऽचिन्तयत्तदा तत्र, ममत्वाकृष्टचेतनः ।
मत्पूर्वैः(फ्) पालितं(म्) पूर्वं(म्) , मया हीनं(म्) पुरं(म्) हि तत् ॥ 12॥

मद्भृत्यैस्तैरसद्वृत्तैर्- धर्मतः(फ्) पाल्यते न वा ।
न जाने स प्रधानो मे, शूरहस्ती सदामदः ॥ 13॥

मम वैरिवशं(यँ) यातः(ख्), कान् भोगानुपलप्स्यते ।
ये ममानुगता नित्यं(म्), प्रसादधनभोजनैः ॥ 14॥

अनुवृत्तिं(न्) ध्रुवं(न्) तेऽद्य, कुर्वन्त्यन्यमहीभृताम् ।
असम्यग्व्ययशीलैस्तैः(ख्), कुर्वद्भिः(स्) सततं(वँ) व्ययम् ॥ 15॥

सञ्चितः(स्) सोऽतिदुःखेन, क्षयं(ङ्) कोशो गमिष्यति ।

**एतच्चान्यच्च सततं(ञ्), चिन्तयामास पार्थिवः ॥ 16॥**

**तत्र विप्राश्रमाभ्याशे वैश्यमेकं(न्) ददर्श सः ।**
**स पृष्टस्तेन कस्त्वं(म्) भो, हेतुश्चागमनेऽत्र कः ॥ 17॥**

**सशोक इव कस्मात्त्वं(न्), दुर्मना इव लक्ष्यसे ।**
**इत्याकर्ण्य वचस्तस्य, भूपतेः(फ्) प्रणयोदितम् ॥ 18॥**

**प्रत्युवाच स तं(वँ) वैश्यः(फ), प्रश्रयावनतो नृपम् ॥ 19॥**

**वैश्य उवाच ॥ 20॥**

**समाधिर्नाम वैश्योऽह- मुत्पन्नो धनिनां(ङ्) कुले ॥ 21॥**
**पुत्रदारैर्निरस्तश्च, धनलोभादसाधुभिः ।**
**विहीनश्च धनैर्दारैः(फ्), पुत्रैरादाय मे धनम् ॥ 22॥**

**वनमभ्यागतो दुःखी, निरस्तश्चाप्तबन्धुभिः ।**
**सोऽहं(न्) न वेद्मि पुत्राणां(ङ्), कुशलाकुशलात्मिकाम् ॥ 23॥**

**प्रवृत्तिं(म्) स्वजनानां(ञ्) च, दाराणां(ञ्) चात्र सं(म्)स्थितः ।**
**किं(न्) नु तेषां(ङ्) गृहे क्षेम- मक्षेमं(ङ्) किं(न्) नु साम्प्रतम् ॥ 24॥**

**कथं(न्) ते किं(न्) नु सद्वृत्ता, दुर्वृत्ताः(ख्) किं(न्) नु मे सुताः ॥ 25॥**

राजोवाच ॥ 26॥

यैर्निरस्तो भवाँल्लुब्धैः(फ्), पुत्रदारादिभिर्धनैः ॥ 27॥

तेषु किं(म्) भवतः(स्) स्नेह- मनुबध्नाति मानसम् ॥ 28॥

वैश्य उवाच ॥ 29॥

एवमेतद्यथा प्राह, भवानस्मद्गतं(वँ) वचः ॥ 30॥

किं(ङ्) करोमि न बध्नाति, मम निष्ठुरतां(म्) मनः ।
यैः(स्) सन्त्यज्य पितृस्नेहं(न्), धनलुब्धैर्निराकृतः ॥ 31॥
पतिस्वजनहार्दं(ञ्) च, हार्दि तेष्वेव मे मनः ।
किमेतन्नाभिजानामि, जानन्नपि महामते ॥ 32॥

यत्प्रेमप्रवणं(ञ्) चित्तं(वँ), विगुणेष्वपि बन्धुषु ।
तेषां(ङ्) कृते मे निःश्वासो, दौर्मनस्यं(ञ्) च जायते ॥ 33॥

करोमि किं(यँ) यन्न मनस्- तेष्वप्रीतिषु निष्ठुरम् ॥ 34॥

मार्कण्डेय उवाच ॥ 35॥

ततस्तौ सहितौ विप्र,  तं(म्) मुनिं(म्) समुपस्थितौ ॥ 36॥

समाधिर्नाम वैश्योऽसौ , स च पार्थिवसत्तमः ।
कृत्वा तु तौ यथान्यायं(यँ),  यथार्हं(न्) तेन सं(वँ)विदम् ॥ 37॥

उपविष्टौ कथाः(ख्) काश्चिच्- चक्रतुर्वैश्यपार्थिवौ ॥ 38॥

राजोवाच ॥ 39॥

भगवं(म्)स्त्वामहं(म्) प्रष्टु- मिच्छाम्येकं(वँ) वदस्व तत् ॥ 40॥

दुःखाय यन्मे मनसः(स्) स्वचित्तायत्ततां(वँ) विना ।
ममत्वं(ङ्) गतराज्यस्य,  राज्याङ्गेष्वखिलेष्वपि ॥ 41॥
जानतोऽपि यथाज्ञस्य,  किमेतन्मुनिसत्तम ।
अयं(ञ्) च निकृतः(फ्) पुत्रैर्- दारैर्भृत्यैस्तथोज्झितः ॥ 42॥

स्वजनेन च सन्त्यक्तस्- तेषु हार्दी तथाप्यति ।
एवमेष तथाहं(ञ्) च,  द्वावप्यत्यन्तदुःखितौ ॥ 43॥

दृष्टदोषेऽपि विषये,  ममत्वाकृष्टमानसौ ।
तत्किमेतन्महाभाग , यन्मोहो ज्ञानिनोरपि ॥ 44॥

ममास्य च भवत्येषा,  विवेकान्धस्य मूढता ॥ 45॥

**ऋषिरुवाच ॥ 46॥**

**ज्ञानमस्ति समस्तस्य,  जन्तोर्विषयगोचरे ॥ 47॥**

**विषयश्च महाभाग , यान्ति चैवं(म्) पृथक् पृथक् ।**
**दिवान्धाः(फ्) प्राणिनः(ख्) केचि- द्रात्रावन्धास्तथापरे ॥ 48॥**

**केचिद्दिवा तथा रात्रौ,  प्राणिनस्तुल्यदृष्टयः ।**
**ज्ञानिनो मनुजाः(स्) सत्यं(ङ्) , किं(न्) तु ते न हि केवलम् ॥ 49॥**

**यतो हि ज्ञानिनः(स्) सर्वे,  पशुपक्षिमृगादयः ।**
**ज्ञानं(ञ्) च तन्मनुष्याणां(यँ) , यत्तेषां(म्) मृगपक्षिणाम् ॥ 50॥**
**मनुष्याणां(ञ्) च यत्तेषां(न्),  तुल्यमन्यत्तथोभयोः ।**
**ज्ञानेऽपि सति पश्यैतान्,  पतङ्गाञ्छावचञ्चुषु ॥ 51॥**

**कणमोक्षादृतान्मोहात्- पीड्यमानानपि क्षुधा ।**
**मानुषा मनुजव्याघ्र,  साभिलाषाः(स्) सुतान् प्रति ॥ 52॥**

**लोभात्प्रत्युपकाराय,  नन्वेतान् किं(न्) न पश्यसि ।**
**तथापि ममतावर्त्ते , मोहगर्ते निपातिताः ॥ 53॥**

**महामायाप्रभावेण,  सं(म्)सारस्थितिकारिणा ।**

तन्नात्र विस्मयः(ख्) कार्यो,  योगनिद्रा जगत्पतेः ॥ 54॥

महामाया हरेश्चैषा , तया सम्मोह्यते जगत् ।
ज्ञानिनामपि चेतां(म्)सि,  देवी भगवती हि सा ॥ 55॥

बलादाकृष्य मोहाय,  महामाया प्रयच्छति ।
तया विसृज्यते विश्वं(ञ्),  जगदेतच्चराचरम् ॥ 56॥

सैषा प्रसन्ना वरदा , नृणां(म्) भवति मुक्तये ।
सा विद्या परमा मुक्तेर्- हेतुभूता सनातनी ॥ 57॥

सं(म्)सारबन्धहेतुश्च , सैव सर्वेश्वरेश्वरी ॥ 58॥

राजोवाच ॥ 59॥

भगवन् का हि सा देवी,  महामायेति यां(म्) भवान् ॥ 60॥

ब्रवीति कथमुत्पन्ना , सा कर्मास्याश्च किं(न्) द्विज ।
यत्प्रभावा च सा देवी,  यत्स्वरूपा यदुद्भवा ॥ 61॥

तत्सर्वं(म्) श्रोतुमिच्छामि,  त्वत्तो ब्रह्मविदां(वँ) वर ॥ 62॥

ऋषिरुवाच ॥ 63॥

**नित्यैव सा जगन्मूर्तिस्- तया सर्वमिदं(न्) ततम् ॥ 64॥**

**तथापि तत्समुत्पत्तिर्- बहुधा श्रूयतां मम ।**
**देवानां(ङ्) कार्यसिद्ध्यर्थ- माविर्भवति सा यदा ॥ 65॥**

**उत्पन्नेति तदा लोके, सा नित्याप्यभिधीयते ।**
**योगनिद्रां(यँ) यदा विष्णुर्- जगत्येकार्णवीकृते ॥ 66॥**

**आस्तीर्य शेषमभजत्- कल्पान्ते भगवान् प्रभुः ।**
**तदा द्वावसुरौ घोरौ, विख्यातौ मधुकैटभौ ॥ 67॥**

**विष्णुकर्णमलोद्‌भूतौ, हन्तुं(म्) ब्रह्माणमुद्यतौ ।**
**स नाभिकमले विष्णोः(स्), स्थितो ब्रह्मा प्रजापतिः ॥ 68॥**

**दृष्ट्वा तावसुरौ चोग्रौ, प्रसुप्तं(ञ्) च जनार्दनम् ।**
**तुष्टाव योगनिद्रां(न्) ता- मेकाग्रहृदयस्थितः ॥ 69॥**

**विबोधनार्थाय हरेर्- हरिनेत्रकृतालयाम् ।**
**विश्वेश्वरीं(ञ्) जगद्धात्रीं(म्), स्थितिसं(म्)हारकारिणीम् ॥ 70॥**

**निद्रां(म्) भगवतीं(वँ) विष्णो- रतुलां(न्) तेजसः(फ्) प्रभुः ॥ 71॥**

ब्रह्मोवाच ॥ 72॥

त्वं(म्) स्वाहा त्वं(म्) स्वधा त्वं(म्) हि , वषट्कारः(स्) स्वरात्मिका ॥ 73॥

सुधा त्वमक्षरे नित्ये , त्रिधा मात्रात्मिका स्थिता ।
अर्धमात्रास्थिता नित्या, यानुच्चार्या विशेषतः ॥ 74॥

त्वमेव सन्ध्या सावित्री, त्वं(न्) देवि जननी परा ।
त्वयैतद्धार्यते विश्वं(न्), त्वयैतत्सृज्यते जगत् ॥ 75॥

त्वयैतत्पाल्यते देवि, त्वमत्स्यन्ते च सर्वदा ।
विसृष्टौ सृष्टिरूपा त्वं(म्), स्थितिरूपा च पालने ॥ 76॥

तथा सं(म्)हृतिरूपान्ते, जगतोऽस्य जगन्मये ।
महाविद्या महामाया, महामेधा महास्मृतिः ॥ 77॥

महामोहा च भवती , महादेवी महासुरी ।
प्रकृतिस्त्वं(ञ्) च सर्वस्य, गुणत्रयविभाविनी ॥ 78॥

कालरात्रिर्महारात्रिर्- मोहरात्रिश्च दारुणा ।
त्वं(म्) श्रीस्त्वमीश्वरी त्वं(म्) ह्रीस्- त्वं(म्) बुद्धिर्बोधलक्षणा ॥ 79॥

लज्जा पुष्टिस्तथा तुष्टिस्- त्वं(म्) शान्तिः क्षान्तिरेव च ।

खड्गिनी शूलिनी घोरा,  गदिनी चक्रिणी तथा ॥ 80॥

शङ्खिनी चापिनी बाण- भुशुण्डीपरिघायुधा ।
सौम्या सौम्यतराशेष- सौम्येभ्यस्त्वतिसुन्दरी ॥ 81॥

परापराणां(म्) परमा , त्वमेव परमेश्वरी ।
यच्च किञ्चित्क्वचिद्वस्तु,  सदसद्वाखिलात्मिके ॥ 82॥

तस्य सर्वस्य या शक्तिः(स्),  सा त्वं(ङ्) किं(म्) स्तूयसे तदा ।
यया त्वया जगत्स्रष्टा,  जगत्पात्यत्ति यो जगत् ॥ 83॥

सोऽपि निद्रावशं(न्) नीतः(ख्),  कस्त्वां(म्) स्तोतुमिहेश्वरः ।
विष्णुः(श्) शरीरग्रहण- महमीशान एव च ॥ 84॥
कारितास्ते यतोऽतस्त्वां(ङ्),  कः(स्) स्तोतुं(म्) शक्तिमान् भवेत् ।
सा त्वमित्थं(म्) प्रभावैः(स्) स्वै- रुदारैर्देवि सं(म्)स्तुता ॥ 85॥

मोहयैतौ दुराधर्षा- वसुरौ मधुकैटभौ ।
प्रबोधं(ञ्) च जगत्स्वामी,  नीयतामच्युतो लघु ॥ 86॥

बोधश्च क्रियतामस्य,  हन्तुमेतौ महासुरौ ॥ 87॥

ऋषिरुवाच ॥ 88॥

एवं(म्) स्तुता तदा देवी, तामसी तत्र वेधसा ॥ 89॥

विष्णोः(फ्) प्रबोधनार्थाय, निहन्तुं(म्) मधुकैटभौ ।
नेत्रास्यनासिकाबाहु- हृदयेभ्यस्तथोरसः ॥ 90॥

निर्गम्य दर्शने तस्थौ, ब्रह्मणोऽव्यक्तजन्मनः ।
उत्तस्थौ च जगन्नाथस्- तया मुक्तो जनार्दनः ॥ 91॥

एकार्णवेऽहिशयनात्- ततः(स्) स ददृशे च तौ ।
मधुकैटभौ दुरात्माना- वतिवीर्यपराक्रमौ ॥ 92॥

क्रोधरक्तेक्षणावत्तुं(म्), ब्रह्माणं(ञ्) जनितोद्यमौ ।
समुत्थाय ततस्ताभ्यां(यँ), युयुधे भगवान् हरिः ॥ 93॥
पञ्चवर्षसहस्राणि, बाहुप्रहरणो विभुः ।
तावप्यतिबलोन्मत्तौ, महामायाविमोहितौ ॥ 94॥

उक्तवन्तौ वरोऽस्मत्तो, व्रियतामिति केशवम् ॥ 95॥

श्रीभगवानुवाच ॥ 96॥

भवेतामद्य मे तुष्टौ, मम वध्यावुभावपि ॥ 97॥

किमन्येन वरेणात्र, एतावद्धि वृतं(म्) मया ॥ 98॥

ऋषिरुवाच ॥ 99॥

वञ्चिताभ्यामिति तदा, सर्वमापोमयं(ञ्) जगत् ॥ 100॥

विलोक्य ताभ्यां(ङ्) गदितो, भगवान् कमलेक्षणः ।
आवां(ञ्) जहि न यत्रोर्वी, सलिलेन परिप्लुता ॥ 101॥

ऋषिरुवाच ॥ 102॥

तथेत्युक्त्वा भगवता, शङ्खचक्रगदाभृता ।
कृत्वा चक्रेण वै छिन्ने , जघने शिरसी तयोः ॥ 103॥

एवमेषा समुत्पन्ना, ब्रह्मणा सं(म्)स्तुता स्वयम् ।
प्रभावमस्या देव्यास्तु, भूयः(श्) शृणु वदामि ते ॥ 104॥

। ऐं ॐ ।

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
मधुकैटभवधो नाम प्रथमोऽध्यायः ॥ 1॥

उवाच 14, अर्धश्लोकाः 24, श्लोकाः 66, एवमादितः ॥ 104॥

